The following roots (and also those having the same meaning) have two such objects दुह् (to milk), याच्, पच्, दण्ड्, रुध्, प्रच्छ्, चि, ब्रु, शास्, जि, मन्थ, मुष् (to steal)—these twelve are known as दुहादि। नी, हृ, कृष्, and वह—these four are known as न्यादि

गां दोग्धि दुग्धम्। धनिनं धनं याचते, भिक्षते। तण्डुलान् ओदनं पचति। तान् शतं दण्डयति। व्रजम् रुणद्धि गाम्। बालकं मार्गं पृच्छति। वृक्षं फलं चिनोति। छात्रं धर्मं ब्रूते, शास्ति, उपदिशति। शतं देवदत्तं जयति। सुधाम् जलधिं मन्थाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति, हरति, कर्षति, वहति।

6. अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्

In connection with intransitive verbs देश (a country), काल (time), भाव (state) and अध्वा (a distance to be traversed) become कर्म; कुरून् स्वपिति (sleeps in the country of the Kurus), मासमास्ते (stays for a month), गोदोहमास्ते (engages himself in milking the cow),

क्रोशमास्ते (goes over one krosa—two miles).

(i) Some roots have two objects in their causative forms.

गति-बुद्धि-प्रत्यवसानार्थ-शब्दकर्मा-कर्मकाणाम् अणि कर्त्ता स णौ

The कर्त्ता in the non-causative form, becomes कर्म in the causative form, in connection with the following roots :—

(*a*) Roots meaning 'to go'.

पुत्रः गृहं गच्छति—माता पुत्रं गृहं गमयति । नीवह्योर्न—प्रभुः भारं नाययति, वाहयति वा, भृत्येन । But if the प्रयोजक कर्त्ता of वह be 'a charioteer—सारथिः अश्वान् रथं वाहयति

(*b*) Roots meaning 'to know'

शिष्यः शास्त्रं बुध्यते—गुरुः शिष्यं शास्त्रं बोधयति

(*c*) Roots meaning 'to eat'.

बलीवर्दाः शस्यं भक्षयन्ति—पालकः बलीवर्दान् शस्यं भक्षयति । भक्षेरहिंसार्थस्य—माता भक्षयति अन्नं शिशुना । आदिखाद्योर्न—माता आदयति खादयति वा अन्नं शिशुना

(*d*) Roots having a शब्द (ग्रन्थ, वाच्य, उपदेश, etc.) as कर्म—

विधिः वेदम् अधीते—विधिं वेदम् अध्यापयति

(*e*) Intransitive roots.

पृथ्वी सलिले आसीत्—पृथ्वीं सलिले आसयत् ।

(ii) जल्पति प्रभृतीनामुपसंख्यानम्

जल्पयति भाषयति वा धर्मं शिष्यं गुरुः

(iii) दृशेश्च—दर्शयति हरिं भक्तान्

(iv) हृक्रोरन्यतरस्याम्

The कर्त्ता of हृ and कृ in the non-causative form, becomes optionally the कर्म in the causative form.

प्रभुः भृत्यं (भृत्येन वा, अनुक्तेकर्त्तरि तृतीया) कटं हारयति, कारयति वा ।

अभिवादिदृशोरात्मनेपदे वा—similarly the कर्त्ता of अभि-वादि and दृशि becomes कर्म when these two are used in आत्मनेपद; अभिवादयते दर्शयते देवं भक्तं भक्तेन वा ।

7. (i) अधिशीङ् स्थासां कर्म

The अधिकरण of अधि + शी, अधि + स्था and अधि + आस् becomes कर्म ; *i. e.* in place of सप्तमी द्वितीया is used.

अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः

(ii) अभि-नि विशश्च

The अधिकरण of अभि + नि + विश् optionally becomes कर्म

धर्मं धर्मे वा अभिनिविशते (applies himself to virtue.)

(iii) उपान्वध्याङ् वसः

The अधिकरण of वस् preceded by उप, अनु, अधि, or आ becomes कर्म ।

उपवसति, अनुवसति, अधिवसति, आवसति, वा वैकुण्ठं हरिः

(*a*) अभुक्त्यर्थस्य न—when उप + वस् means 'to fast' its अधिकरण does not become कर्म । तीर्थे उपवसति (he fasts while staying in the holy place.)

(iv) उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु

द्वितीया is used in connection with उभतः, सर्वतः, धिक्, and with उपरि, अधि and अधः when repeated.

गृहं सर्वतः (on all sides) अङ्गनानि; नदीमुभयतो वृत्ताः, धिक् कृष्णाभक्तम्; उपर्युपरि लोकम् ईश्वरः, अध्यधि लोकम्, अधोऽधो लोकम् ।

(v) अभितः परितः समया (near) निकषा (near) हा प्रति योगेऽपि । ग्रामम् अभितः, गृहं परितः, ग्रामं निकषा, समया वा, हा पापिनम्, मां प्रति सदयो भव ।

8. अन्तरान्तरेणयुक्ते

त्वां मां च अन्तरा (between) हरिः,
विद्याम् अन्तरेण (without) सुखं नास्ति

9. कर्मप्रवचनीययुक्ते द्वितीया

अनु, उप and some other indeclinables, though they do not actually qualify the verb,

yet, in particular senses, denote its relation, and are used independently of the verb. Then they are called कर्मप्रवचनीय ।

द्वितीया is used in connection with a कर्मप्रवचनीय; अनु or उप हरिम् सुराः (gods are inferior to हरि) राममनुज्ञातो लक्ष्मणः;

10. कालाध्वनोरत्यन्तसंयोगे

To denote 'length of duration or place' द्वितीया is used.

मासं व्याकरणम् अधीते—reads grammar for a month.

क्रोशं कुटिला नदी—the river is meandering for two miles.

11. क्रियाविशेषणे च

सुखं निद्राति, मधुरं हसति, सत्वरं गच्छति ।

करण–तृतीया

1. साधकतमं करणम्

That which is regarded as the chief means of performing the action is called करण (instrumental.)

कर्तृकरणयोस्तृतीया

The कर्त्ता which is *not spoken of* takes तृतीया, so also does करण

मया पुस्तकं पठ्यते । हस्तेन गृह्णाति ।

2. दिवः कर्म च

The करण of दिव् (to play) optionally becomes कर्म । अक्षैः अक्षान् वा दीव्यति

3. प्रकृत्यादिभ्य उपसंख्यानम्

तृतीया is taught in connection with प्रकृति, etc. प्रकृत्या चारुः, स्वभावेन सुन्दरः, सुखेन याति, प्रायेण दृश्यते, जात्या ब्राह्मणः, नाम्ना रामः, धान्येन धनवान्,

4. अपवर्गे तृतीया (कालाध्वनोः)
अपवर्गः फलप्राप्तिः ।

Words denoting ' length of duration and space ' take तृतीया (and not २या) when the action is known to be finished and the result obtained.

मासेन व्याकरणमधीतम् (grammar has been finished in one month.)

क्रोशेन पुस्तकमधीतम् (the book is finished while going over two miles.)

Cf. कालाध्वनोरत्यन्तसंयोगे etc.

5. सहार्थैः (सहयुक्तेऽप्रधाने इति पाणिनिः); पिता पुत्रेण सह याति ।

सहार्थाः—सह, साकं, सार्द्धं, समम्

तृतीया is used even when सह etc. are understood. वृद्धो यूना याति ।

6. येनाङ्गविकारः

The limb that causes a deformity of a person takes तृतीया

अक्ष्णा काणः (blind of an eye), पादेन खञ्जः।

7. इत्थंभूतलक्षणे

The special mark that distinguishes a thing takes तृतीया

जटाभिः तापसः ज्ञायते।

8. हेतौ

धनेन कुलम्, पुण्येन दृष्टो हरिः, दण्डेन घटः।

9. संज्ञोऽन्यतरस्यां कर्मणि

The object of सं + ज्ञा takes तृतीया optionally; पित्रा पितरं वा संजानीते (recognises his father).

10. हीनप्रयोजनार्थैश्च

तृतीया is used in connection with words signifying 'less' and 'necessity'.

एकेन ऊनः, विद्यया हीनः, विवादेन अलम्, कोऽर्थः मूर्खेण पुत्रेण?

सम्प्रदान–चतुर्थी

1. कर्मणा यमभिप्रैति स सम्प्रदानम्

That which is intended as the receiver of a gift is called सम्प्रदान (Dative.)

2. चतुर्थी सम्प्रदाने

दरिद्राय धनं ददाति

3. क्रियया यमभिप्रैति सोऽपि संप्रदानम्

He, for whose sake an action is performed, is also सम्प्रदान

पुत्राय चन्द्रं दर्शयति, शिशवे क्रीड़नकमाहरति, शुकाय कृष्ण कृष्णेति पठति, पत्ये शेते, पुत्राय हसति, राज्ञे निवेदयति, मह्यं ब्रवीति ।

4. तादर्थ्ये

That for which something else is meant takes चतुर्थी

कुण्डलाय हिरण्यम्, पिपासायै जलम्, ज्ञानाय अध्ययनम्, मशकाय धूमः

5. रुच्यर्थानां प्रीयमाणः

When a verb meaning 'to like' is used, he who likes is सम्प्रदान

तुभ्यं रोचते मांसम्, हरये रोचते भक्तिः

6. श्लाघ-ह्नुङ्-स्था-शपां ज्ञीप्स्यमानः

He, to whom the desire is sought to be made known, by the use of roots श्लाघ्, ह्नु (to hide), स्था and शप् (condemn), is सम्प्रदान—

गोपी कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा ।

7. धारेरुत्तमर्णः

When the root धारि (to borrow) is used the creditor is सम्प्रदान

देवदत्ताय शतं धारयति

8. स्पृहेरीप्सितः

When स्पृह् (to desire) is used the thing desired is सम्प्रदान

धनाय स्पृहयति

9. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः

When roots meaning 'to be angry', 'to hate', 'to envy', 'to grudge' are used, the object of those deeds is सम्प्रदान

शत्रवे क्रुध्यति, मित्राय द्रुह्यति, प्रतिवासिने ईर्ष्यति असूयति।

But क्रुधद्रुहोरुपसृष्टयोः कर्मः

When क्रुध् and द्रुह् are preceded by an उपसर्ग the object takes द्वितीया

क्रूरम् अभिक्रुध्यति, अभिद्रुह्यति।

10. प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता

When प्रति + श्रु and आ + श्रु are used, the agent who causes one to make a promise is सम्प्रदान

भिक्षुकेण मह्यं देहीति प्रवर्त्तितः भिक्षुकाय धनं प्रतिशृणोति आशृणोति वा।

11. क्लृपि सम्पद्यमाने च

When क्लृप् etc. (roots meaning 'to become') are used that which so becomes is सम्प्रदान;

भक्तिः ज्ञानाय कल्पते, सम्पद्यते, जायते, भवति

12. सुखयोगेऽपि (चतुर्थी)

सुखं शिष्याय

13. क्रियार्थोपपदस्य च कर्मणि स्थानिनः
ऊह्यायाः तुमुन्प्रत्ययान्त-क्रियायाः कर्मकारके चतुर्थी स्यात्, सा चेत् ऊह्यक्रिया उक्तक्रियायाः हेतुर्भवेत् ।

The object, of तुमन्त verb if understood, takes चतुर्थी, when another action is performed for its sake.

काष्ठाय याति (काष्ठम् आनेतुमित्यर्थः)

14. तुमर्थाच्च भाव-वचनात्
Words formed by suffixes in भाववाच्य in the sense of तुम् take चतुर्थी

पाकाय याति (पक्तुमित्यर्थः) । पाकः = पच् + भावे घञ् ।
Mark the subtle distinction between 13 and 14.

15. नमः—स्वस्ति—स्वाहा—स्वधा—ऽलं—वषड्—योगाच्च ।
नमो देवेभ्यः, स्वस्ति प्रजाभ्यः, स्वाहा अग्नये, स्वधा पितृभ्यः, अलं (समर्थः) मल्लो मल्लाय, वषट् इन्द्राय
N. B.—उपपद-विभक्तेः कारकविभक्तिर्बलीयसी

A विभक्ति by virtue of a word, such as सुख, नमः, etc., is of weaker force than that by virtue of a कारक ; so देवान् नमस्करोति and not देवेभ्यः नमस्करोति । But the latter may be supported by rule 13—देवान् प्रीणयितुम् इत्यर्थः

16. मन्यकर्मण्यनादरे विभाषाऽप्राणिषु

The object other than an animal, of मन् used

in the sense ' to regard slightly ' optionally takes चतुर्थी

न त्वां तृणाय तृणं वा मन्ये (I do not regard you even as a straw.)

Note that here प्राणि is technical and stands for नौ, काक, अन्न, शुक and शृगाल। नौ-काकान्नशुकशृगालवर्ज्येषु ।

Hence न त्वां नावम् अन्नं वा मन्ये—here though नौ and अन्न are not animals yet चतुर्थी cannot be used.

But न त्वां शुने मन्ये—here श्वा (a dog) though an animal takes चतुर्थी ।

17. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि

Objects, other than a path, of roots meaning ' to go ' take द्वितीया or चतुर्थी, if there is actual physical movement.

ग्रामाय ग्रामं वा गच्छति

But मनसा मथुरां (and not मथुरायै) गच्छति, for here no physical movement is meant.

अध्वानं गच्छति—here the object is a path actually traversed ;

But उत्पथात् पथे (४ र्थी) गच्छति (he turns to the path of rectitude from the path of vice)—here the path being no physical one, चतुर्थी is allowable.

---

not understood the meaning of the Sutras.

अपादान–पञ्चमी

1. ध्रुवमपायेऽपादानम्

That from which something else becomes disunited is called अपादान (Ablative.)

ध्रुवम्—that which remains firm.

अपाये—in the case of being disunited.

2. अपादाने पञ्चमी

वृक्षात् पत्रं पतति, अश्वात् पतितः, जलात् उत्थितः, गृहात् प्रस्थितः

3. जुगुप्सा-विराम-प्रमादार्थानामुपसंख्यानम्

एतेषां त्रयाणां धातूनां तदर्थानां च प्रयोगे यस्मात् जुगुप्सा (disgust) विरतिः (cessation) प्रमादः (swerveing) च भवति तदपादानम्।

पापात् जुगुप्सते, अध्ययनात् विरमति, धर्मात् प्रमाद्यति,

4. भीत्रार्थानां भयहेतुः

When roots meaning 'to fear' and 'to protect' are used the cause of the fear is अपादान

व्याघ्रात् बिभेति, विपदः त्रायते, दस्योः रक्षति।

5. पराजेरसोढः

When परा + जि is used that which is not tolerated is अपादान

अध्ययनात् पराजयते, धर्मात् पराजयते

6. वारणार्थानामीप्सितः

When roots meaning ' to prohibit ' are used that which is desired to be saved is अपादान

यवेभ्यो गां वारयति, अन्नेभ्यः काकं वारयति ।

Note अनीप्सितमपि—व्यसनात् पुत्रं निषेधति

7. अन्तर्धौ येनादर्शनमिच्छति ।

In the act of hiding he from whom hiding is desired is अपादान; गुरोरन्तर्धत्ते, मातुर्निलीयते कृष्णः

8. आख्यातोपयोगे ।

When learning according to prescribed rules is meant the teacher is अपादान

उपाध्यायात् अधीते

But गायकात् गीतं शृणोति is quite correct, though गायकस्य गीतं शृणोति would be in strict conformity with this rule.

9. जनिकर्त्तुः प्रकृतिः

The origin from which the agent of जन् (to be born) is born is अपादान

ब्रह्मणः लोकाः जायन्ते

10. भुवः प्रभवः

The source from which a thing springs up is अपादान

हिमालयात् गङ्गा प्रभवति

11. ल्यब्लोपे कर्मण्यधिकरणे च ।

The कर्म and the अधिकरण of the infinite verb formed with ल्यप् and remaining understood, take पञ्चमी

प्रासादात् पश्यति—प्रासादमारुह्य इत्यर्थः

आसनात् पश्यति—आसने उपविश्य इत्यर्थः।

12. यतश्चाध्वकालनिर्माणम् तत्र पञ्चमी।

That from which a distance or a length of duration is measured gets पञ्चमी।

प्रयागात् त्रिंशत् क्रोशाः, माघात् तृतीये मासि

N. B.—तद्युक्तात् अध्वनः प्रथमासप्तम्यौ, कालात् सप्तमी च वक्तव्या

So वनात् ग्रामो योजनं योजने वा

विवाहात् दशमे दिने।

13. अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते

पञ्चमी is used in connection with अन्य etc.

अन्यार्थ—मित्रादन्यः कः परित्रातुं समर्थः ?

विष्णुः शिवात् भिन्नः, इतरः, अपरः वा।

आरात् (=दूर, समीप)—ग्रामात् आरात् वनम्

ऋते—ज्ञानात् ऋते मोक्षो नास्ति (द्वितीयापि—श्रमम् ऋते विद्या न भवति)

(i) दिक्शब्द—ग्रामात् पूर्वः

(ii) माघात् पूर्वः पौषः, उत्थानात् परतः

अञ्च्-भागान्त—ग्रामात् प्राक् (पूर्वः) वृक्षः

आच्-प्रत्ययान्त—हिमालयात् दक्षिणा भारतवर्षम्

आहि-प्रत्ययान्त—प्रयागात् दक्षिणाहि विन्ध्यः

14. प्रभृति बहिर्य्यां च

जन्मतः प्रभृति अन्धः, तस्मात् दिनात् आरभ्य । ग्रामात् बहिः

15. पञ्चम्यपाङ्परिभिः

पञ्चमी is used in connection with अप and परि (meaning 'excluding') and with आ (meaning 'including' and 'excluding'.)

अप परि वा संसारात् सुखम्; आ मुक्तेः संसारः, आ सकलात् ब्रह्म ।

16. विभाषा गुणेऽस्त्रियाम्

Qualitative words (excepting those that are feminine) used as a reason take पञ्चमी optionally.

अन्धत्वात् (अन्धत्वेन वा) न पश्यति

But (i) बुद्ध्या मुक्तः (बुद्धि, fem.)

(ii) धनेन कुलम् (धन, not a qualitative word).

Exception to (ii) पर्वतो वह्निमान् धूमात् । This is known as हेतौ पञ्चमी

Exception to (i) अत्र नास्ति घटः अनुपलब्धेः

17. पृथग्विनानानाभिस्तृतीयान्यतरस्याम्

तृतीया, पञ्चमी and द्वितीया are used in connection with पृथक्, विना and नाना

Instances are very rare with पृथक् and नाना ।

रामं, रामेण, रामात् वा विना ।

18. करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य

When स्तोक (little), अल्प, कृच्छ्र (difficulty) and कतिपय have the sense of the instrumental and are not used as adjuncts, they take तृतीया and पञ्चमी

स्तोकेन स्तोकात् वा मुक्तः

But स्तोकेन विषेण हतः, स्तोकं पचति

19. दूरान्तिकार्थेभ्यो द्वितीया च

Words signifying 'distance' and 'nearness' take द्वितीया, तृतीया and पञ्चमी

ग्रामस्य दूरं दूरेण दूरात् वा

20. पञ्चमी विभक्ते (निकृष्टादेकोत्कर्षे)

When of two one is meant to be superior or inferior, that from which the distinction is made takes पञ्चमी

धनात् विद्या गरीयसी

21. हेतौ पञ्चमी (तृतीया च)

भयात् भयेन वा कम्पः

सम्बन्ध–षष्ठी

Note that सम्बन्ध is no कारक in Sanskrit. क्रियान्वयि कारकम् ।

1. षष्ठी शेषे

षष्ठी is used in the remaining cases, *i. e.* those that have not been already provided for, *i. e.*, generally in stating a relation of 'possession.'

तव गृहम्, वृक्षस्य पत्रम्, राज्ञः पुरुषः ।
कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव—सतां गतम्, सर्पिषो जानीते, मातुः स्मरति, फलानां तृप्तः, भजे शंभोः चरणयोः ।

2. षष्ठी हेतुप्रयोगे

षष्ठी is used when the word हेतु is applied ;
अर्थस्य हेतोः सेवते

3. सर्वनाम्न स्तृतीया च

When the word हेतु is connected with a सर्वनाम, षष्ठी and तृतीया are used.
केन हेतुना कस्य हेतोः वा स आगतः

4. एनपा द्वितीया च

द्वितीया and षष्ठी are used in connection with words formed with the suffix एनप्
उद्यानं उद्यानस्य वा दक्षिणेन पर्वतः

5. दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्

षष्ठी and पञ्चमी are used in connection with words signifying 'distance' and 'nearness.'

ग्रामस्य ग्रामात् वा दूरम् *cf.* Rule 19 of the previous section.

6. अधीगर्थदयेशां कर्मणि

अधीगर्थः = स्मृत्यर्थः

The कर्म of roots meaning 'to recollect', and of दय् (to favour) and ईश् (to lord it over) optionally takes षष्ठी

मातुः स्मरति, दरिद्रस्य दयते, पुत्रस्य ईष्टे।
पक्षे द्वितीया

7. जासि-निप्रहन-नाट-क्राथ-पिषां हिंसायाम्

The कर्म of जास् etc., having the implication of ' harm ' optionally takes षष्ठी

चौरस्य उज्जासयति, शत्रोः निहन्ति प्रहन्ति निप्रहन्ति प्रणिहन्ति वा। शत्रोः पिनष्टि। पक्षे द्वितीया।

But यवान् पिनष्टि

8. कर्तृ-कर्मणोः कृति

The कर्त्ता and the कर्म of कृदन्त verbs take षष्ठी।

ईश्वरस्य कृतिः, शिशोः शयनम्
पयसः पानम्, अन्नस्य पाकः

N. B.—Verbs may be divided into two classes.

(i) तिङन्त and (ii) कृदन्त

(i) तिङन्त—भवति, अकरोत्, जगाम

(ii) कृदन्त—कृतिः, गमनम्, पाकः

The कर्त्ता and कर्म of तिङन्त verbs generally take प्रथमा and द्वितीया respectively. But the कर्त्ता and कर्म of कृदन्त verbs take षष्ठी

When a doubt arises as to the exact conjugation of a root students most often split up a तिङन्त verb into its correspond-

ing कृदन्त and तिङन्त forms—thus, for भुङ्क्ते they write भोजनं करोति, but they at the same time forget to apply this rule ; thus for बालकः अन्नं भुङ्क्ते they write ' बालकः अन्नं भोजनं करोति। They should beware that the correct form is बालकः अन्नस्य भोजनं करोति।

(*a*) गुणकर्मणि वेष्यते

The indirect object takes षष्ठी optionally ; नेता अश्वस्य गृहस्य (गृहं गृहे वा)

9. उभयप्राप्तौ कर्मणि

When, according to Rule 8, षष्ठी is applicable both to the कर्त्ता and कर्म simultaneously, it is applied to the कर्म only.

गवां दोहः गोपेन—here in connection with the कृदन्त word दोह its कर्त्ता 'गोप' and कर्म 'गो' are both to have षष्ठी by Rule 8. But this rule restricts षष्ठी to the कर्म only, and the कर्त्ता gets the usual विभक्ति *i. e.* प्रथमा in कर्तृवाच्य, तृतीया in कर्मवाच्य।

बालकः चन्द्रस्य दर्शनं करोति

(*a*) स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः

But this rule does not apply when the कृदन्त word is formed with the feminine suffixes

श्रक and श्रा । भेदिका विभित्सा वा रुद्रस्य जगतः—here both the कर्त्ता and the कर्म take षष्ठी

(*b*) शेषे विभाषा—

In connection with all other feminine कृदन्त words the कर्त्ता takes षष्ठी optionally.

विचित्रा जगतः कृतिः हरेः हरिणा वा ।

Some would not like to restrict this rule to feminine words only, but they say that षष्ठी is used in connection with all कृदन्त words of all genders.

शब्दानाम् अनुशासनम् आचार्यस्य आचार्येण वा

10. कस्य च वर्त्तमाने

The कर्त्ता of a कृदन्त word formed with क्त in the present tense, takes षष्ठी

'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्त्तमाने क्तः।
राज्ञां मतः, सतां बुद्धः जनानां पूजितः ।

11. अधिकरणवाचिनश्च

षष्ठी is used also in connection with क्त in the अधिकरणवाच्य । इदमेषां शयितम्

12. न लोकाव्ययनिष्ठाखलर्थतृनाम्

Exceptions to rule 8.

ल (शतृ, शानच्कसु, कानच्)—उ (उकारान्त-प्रत्ययाः)—उक—अव्यय (तुमु, क्त्वाच्)—निष्ठा (क्त, क्तवतु)—खलर्थ—तृन्

षष्ठी is not used in connection with words formed with ल etc.

ल—ईश्वरः सृष्टिं कुर्वन् कुर्वाणो वा वर्त्तते । शास्त्रं विविद्वान् । उ—जलं पिपासुः । उक—दैत्यान् घातुकः हरिः । अव्यय—गृहं गत्वा, अन्नं भोक्तुम् । निष्ठा—गृहं गतवान्, तेन शत्रुः निहतः । खलर्थ—न तत् मया सुकरम् । तृन्—धनं दाता ।

धनस्य दाता is also correct, but in that case दाता has to be derived not with तृन् but with तृच्

(*a*) द्विषः शतुर्वा—शत्रुं शत्रोः वा द्विषन्

(*b*) अकेनोर्भविष्यदाधमर्ण्ययोः

षष्ठी is not used in connection with words formed with अक् and इन् in a future sense and with इन् in the sense of a debtor.

सन्तं पालकः अवतरति हरिः । व्रजं गामी, शतं दायी ।

13. कृत्यानां कर्त्तरि वा

मम मया वा सेव्यः हरिः । तव त्वया वा पठितव्यम् । तस्य तेन वा गन्तव्यम् ।

14. तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्

षष्ठी and तृतीया are used in connection with words signifying ‘ comparison ’ ;

तेन तस्य वा तुल्यः, तव त्वया वा सदृशः, समः । But in connection with तुला and उपमा षष्ठी only is used.

तव तुला उपमा वा नास्ति ।

15. चतुर्थी च आशिषि आयुष्यमद्रभद्रकुशलसुखार्थहितैः

In the sense of blessing षष्ठी and चतुर्थी are optionally used in connection with आयुष्य, मद्र, etc.

आयुष्यं भद्रं वा शिष्यस्य शिष्याय वा

16. तृप्त्यर्थानां विभाषा करणे

करण of roots meaning 'satisfaction' optionally takes षष्ठी। फलानां फलैः वा तृप्तः।

अधिकरण—सप्तमी

1. आधारोऽधिकरणम्

That in which the action is located is called अधिकरण

अधिकरण is of five kinds :—

सामीप्य—गङ्गायां वसति - गङ्गासमीपे इत्यर्थः।

एकदेश—गृहे स्वपिति-गृहस्य एकदेशे इत्यर्थः।

विषय—धर्मे मतिरस्ति—धर्मविषये इत्यर्थः।

अभिव्याप्ति—तिले तैलमस्ति—तिलमभिव्याप्य इत्यर्थः।

काल—वर्षासु वृष्टिर्भवति—वर्षाकाले इत्यर्थः।

Note that, strictly speaking, the action really abides either in the कर्त्ता or in the कर्म and not in the अधिकरण, yet it is said to be located in the अधिकरण because of its close connection with the कर्त्ता and the कर्म।

2. सप्तम्यधिकरणे ।

गृहे तिष्ठति स्थाल्यां पचति

3. निमित्तात् कर्मयोगे ।

The thing, for which the action is performed, takes सप्तमी, if it is connected with the object of the verb.

चर्मणि हरिणं हन्ति । केशेषु चमरीं हन्ति ।

Note मांसाय हरिणं हन्ति—here चतुर्थी by 'क्रियार्थोपपद'—

4. यस्य च भावेन भावलक्षणम् ।

When the time of an action is determined by that of another, the latter is expressed by सप्तमी ; रजन्यां प्रभातायां स आगतः । सूर्ये अस्तमिते स प्रस्थितः ।

(This is ordinarily known as भावे सप्तमी)

5. षष्ठी चानादरे ।

When 'neglect' is shown by an action, that which is so neglected takes षष्ठी or सप्तमी ; रुदतः शिशोः, रुदति शिशौ वा माता जगाम ।

6. स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च

षष्ठी and सप्तमी are used in connection with स्वामी etc.

गवां गोषु वा स्वामी । विवादस्य विवादे वा साक्षी ।

7. यतश्च निर्द्धारणम्

When one, out of a group, is specified in respect of its 'class,' 'quality,' 'action'

or 'name', the word expressive of the group takes षष्ठी or सप्तमी

जाति—नृणां नृषु वा ब्राह्मणः श्रेष्ठः
पशूनां पशुषु वा सिंहः श्रेष्ठः
गुण—गवां गोषु वा कृष्णा बहुक्षीरा
क्रिया—वक्तॄणां वक्तृषु वा मिष्टभाषी पूज्यते
संज्ञा—छात्राणां छात्रेषु वा माधवः बुद्धिमत्तमः
cf पञ्चमीविभक्ते

8. सप्तमीपञ्चम्यौ कारकमध्ये

The words denoting 'time' or 'path' between two actions take सप्तमी and पञ्चमी ;
अद्य भुक्त्वा अयं द्व्यहे द्व्यहात् वा भोक्ता; अत्र स्थित्वा क्रोशे क्रोशात् वा लक्ष्यं विध्येत् ।

9 साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः

सप्तमी is used in connection with साधु and निपुण when they signify 'respect', but not when प्रति intervenes.
मातरि साधुः निपुणो वा । But मातरं प्रति साधुः ।

10. विवक्षावशात् कारकाणि

In the previous sections special cases have been prescribed for the use of special कारकs. But these rules are not often strictly adhered to. It is the option of the speaker to say either गृहं गच्छति or गृहे गच्छति, शिष्याय ज्ञानं वितरति or शिष्ये ज्ञानं वितरति ।

अपादान-सम्प्रदान-करणाधार-कर्मणाम् ।
कर्त्तुश्चान्योन्यसन्देहे परमेकं प्रवर्त्तते ॥

In the instance अञ्जलिं कृत्वा प्रणमति the word अञ्जलि admits of द्वितीया, being the object of कृत्वा, and of तृतीया, being the करण of प्रणमति । If a doubt arises as to which of two or more कारकs simultaneously applicable has to be used, the above couplet lays down that the कारक mentioned later in the list अपादान, सम्प्रदान, करण, अधिकरण, कर्म and कर्तृ should be used.

CHAPTER XV.

समास

विधिम् अनतिक्रम्य	यथाविधि
राज्ञः पुरुषः	राजपुरुषः
नीलम् पद्मम्	नीलपद्मम्
पुरुषः सिंह इव	पुरुषसिंहः
कुम्भं करोति यः सः	कुम्भकारः
पञ्चभिः गोभिः क्रीतः	पञ्चगुः
पीतम् अम्बरं यस्य सः	पीताम्बरः
रामश्च लक्ष्मणश्च	रामलक्ष्मणौ

In the above instances the same idea is expressed in two forms. The first column contains forms having two or more words, while the second column contains forms that have those separate words combined into one complete word.

Thus when two or more suitable words are combined into one complete word it is said to be a समास ।

विभक्तिs of all the words that go to form a समास drop, and a suitable विभक्ति is attached to the complete word. [सुपो धातुप्रातिपदिकयोः)

Compounds are primarily of four kinds—अव्ययीभाव, तत्पुरुष, बहुव्रीहि and द्वन्द्व

There are again varieties of these four. These varieties will be noted in proper places.

N. B.—सुपां सुपा, तिङा, नाम्ना, धातुनाथ तिङां तिङा ।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥
(१) सुप्+सुप्—राजपुरुषः, (२) सुप् + तिङ्—पर्यभूषत् (३) सुप् + नाम (प्रातिपदिक)—कुम्भकारः, (४) सुप् + धातु—कटप्रूः (worm that eats into mats, etc.), (५) तिङ् + तिङ्—खादतपिबता (a festival specially characterised by eating and drinking), (६) तिङ्+सुप्—कृन्तविचक्षणा

सह सुपा

A सुबन्त word is compounded with other suitable word or words (the latter may be सुबन्त or तिङन्त). नीलोत्पलम्, पीताम्बरः, नातिशीतोष्णम्, भूतपूर्वः, अपचसि ।

This is the most general rule of compounds and applies to all compound words. But special rules have been made for almost all compound words (or groups of such words). Those compound words, that cannot be accounted for by any of the special rules, are accounted for by this, and they form a class of their own, ordinarily known as सुप्सुपेति समास । In the instances given above the first two (नीलोत्पलम्,

पीताम्बरः) are formed by the application of special rules, whereas no special rule applies to the rest, and hence these (and not the first two) are pre-eminently instances of सुप्सुपेति समास

Section 1.

अव्ययीभाव

(Adverbial Compounds).

An अव्यय is compounded with another suitable word in different senses – it is called अव्ययीभाव समास

(*a*) अव्ययीभावश्च

The whole word formed by अव्ययीभावसमास is an अव्यय and neuter.

(*b*) प्रथमानिर्दिष्टं समास उपसर्जनम्

The member of a compound, referred to by the प्रथमान्त word in the rules of compounds, is called उपसर्जन

(*c*) उपसर्जनं पूर्वम्—Of the members of a compound the उपसर्जन is placed first.

(*d*) अव्ययाद् आप्सुप :

The आप् and the विभक्ति of an अव्यय drop, *e. g.*, आप्— तत्र लतायाम्। सुप्—यथाशक्ति, अनुविष्णु ।

(*d*1.) नाव्ययीभावादतोऽम् त्वपञ्चम्याः

The विभक्ति of an अकारान्त अव्ययीभाव does not drop ; and all विभक्ति except पञ्चमी are replaced by अम् । गृहस्य समीपे उपगृहम्, गृहस्य समीपः उपगृहम् । But गृहस्य समीपात् उपगृहात्

(*d*2.) तृतीया सप्तम्योर्बहुलम्

In many instances तृतीया and सप्तमी are substituted by अम् optionally.

उपगृहम् उपगृहेण, उपगृहम् उपगृहे ।

(*e*) ह्रस्वो नपुंसके प्रातिपदिकस्य—In neuter gender the final long vowel of a word is shortened. निद्रा न युज्यते अधुना-अतिनिद्रम्

Instances of अव्ययीभाव समास

कृष्णमधिकृत्य या कथा सा अधिकृष्णं कथा

कण्ठस्य समीपे—उपकण्ठम् (उपकण्ठे वा)

भिक्षायाः अभावः—दुर्भिक्षम्

कम्बलस्य नायं कालः—अतिकम्बलं कालः

शिवस्य पश्चात्—अनुशिवम्

रूपस्य अनु—अनुरूपम्, दिने दिने प्रतिदिनम्, शक्तिम् अनतिक्रम्य यथाशक्ति, हरेः सादृश्यम् सहरि ।

तृणमपि अपरित्यज्य सतृणम् । समुद्रपर्यन्तम् आसमुद्रम् । ग्रामात् बहिः बहिर्ग्रामम् । अग्निम् अभि अभ्यग्नि (towards fire), अनुगङ्गम् वाराणसी (along-side).

2. पारेमध्ये षष्ठ्या वा—पारे and मध्ये are optionally compounded with a षष्ठ्यन्त word (this is अव्ययीभाव); गङ्गायाः पारम् पारेगङ्गम्, गङ्गायाः मध्यम् मध्येगङ्गम्, पक्षे गङ्गापारम् गङ्गामध्यम्

3. नदीभिश्च

A numeral makes an अव्ययीभाव समास with a word denoting a river (in the sense of 'aggregate'.)

पञ्चानां नदीनां समाहारः पञ्चनदम्

4. अन्यपदार्थे च संज्ञायाम्

A word denoting a river makes an अव्ययीभाव समास with a सुबन्त word when the whole word is a name of something else :— उन्मत्ता गङ्गा यस्यां उन्मत्तगङ्गम् (कश्चिद् देशः)

Rules about the last member of अव्ययीभाव

1. अव्ययीभावे शरत्प्रभृतिभ्यः (टच्-अ)

In अव्ययीभाव समास शरत्, जरस् etc. take the समासान्त suffix टच्। उपशरदम्; उपजरसम्

2. प्रतिपरसमनुभ्योऽक्ष्णः

अक्षि after प्रति, पर, सम् and अनु takes टच्; प्रत्यक्षम्, परोक्षम्, समक्षम्, अन्वक्षम् (forth-with.)

3. अनश्च—words ending in अन् take टच्, उपराजम्, आत्मानमधिकृत्य अध्यात्मम्

[*N. B.*—न drops by ' नस्तद्धिते '.]

4. नपुंसकादन्यतरस्याम्

Neuter words ending in अन् take टच optionally. उपचर्मम् उपचर्म । अहि अहि प्रत्यहं प्रत्यहः ।

5. नदीपौर्णमास्याग्रहायणीभ्यः

These optionally take टच्; नद्याः समीपम् उपनदम् उपनदि

6. झयः

Words ending झय् (1st, 2nd, 3rd and 4th letters of a वर्ग) take टच optionally; उपसमिधम् उपसमित्, उपदृषदम् उपदृषत् ।

7. गिरेश्च सेनकस्य

गिरि takes टच् according to सेनक; उपगिरम् उपगिरि ।

8. गोस्त्रियोरुपसर्जनस्य

(उपसर्जन here means अप्रधान)

अ-प्रधानीभूत-गोशब्दान्तस्य, अप्रधानीभूत-स्त्रीप्रत्ययान्तस्य समासस्य अन्त्य-स्वरवर्णस्य स्थाने ह्रस्वादेशः स्यात् ।

In बहुव्रीहि and अव्ययीभाव compounds the final vowel of गो and of words made feminine by the addition of a suffix is shortened. उपगु, अधिस्त्रि ।

9. तिष्ठद्गुप्रभृतीनि च—these are irregularly formed. तिष्ठन्ति गावः यस्मिन् काले स तिष्ठद्गु कालः । आयन्ति गावः यदा स कालः आयतीगवम्

Section 2.

तत्पुरुषः

(Determinative Compounds.)

गृहंगतः—गृहगतः। विद्यया हीनः—विद्याहीनः। कुण्डलाय हिरण्यम्—कुण्डलहिरण्यम्। व्याघ्रात् भीतः—व्याघ्रभीतः। पयसः पानम्—पयःपानम्। रणे पटुः—रणपटुः।

In the above instances a couple of words is compounded, of which the first word gets द्वितीया, तृतीया, etc., according to the meaning, and the second word gets प्रथमा। Such compounds are known as तत्पुरुषः and are named as द्वितीया तत्पुरुष, तृतीया तत्-पुरुष, etc., according as the विभक्ति of the first word. The gender of the compound is determined by that of the last word.

A

1. (*a*) द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः

A द्वितीयान्त word is compounded with श्रित, अतीत etc.; कृष्णं श्रितः कृष्णाश्रितः, दुःखम् अतीतः दुःखातीतः, कूपं पतितं कूपपतितः

(*b*) गम्यादीनामुपसंख्यानम्

ग्रामं गमी ग्रामगमी, अन्नं बुभुक्षुः अन्नबुभुक्षुः, वेदं विद्वान् वेदविद्वान्।

(c) कालाः अत्यन्तसंयोगे

A द्वितीयान्त word signifying 'extention of time' is compounded with a सुबन्त word; मुहूर्त्तं सुखं मुहूर्त्तसुखम्, वर्षं भोग्यं वर्षभोग्यम्

2. (a) (तृतीया) पूर्व-सदृश-समो-नार्थ-कलह-निपुण-मिश्र-श्लक्ष्णैः

पूर्वप्रभृतिभिः अष्टभिः शब्दैः तृतीयान्तशब्दः समस्यते। मासेन पूर्वः मासपूर्वः, पितृसदृशः, गुरुसमः, एकोनः, वाचा कलहः वाक्कलहः, वाङ्निपुणः, गुडमिश्रः, आचारश्लक्ष्णः।

(b) कर्त्तृकरणे कृता बहुलम्

In many cases a तृतीयान्त कर्त्ता or करण is compounded with the कृदन्त word. सर्पेण दष्टः सर्पदष्टः। शरेणः भिन्नः शरभिन्नः। But दात्रेण लूनवान् (here no समास)

(c) Other instances of तृतीया तत्पुरुष

वातच्छेद्यानि तृणानि, काकपेया नदी (कृत्यैरधिकार्यवचने); दध्ना उपसिक्तः ओदनः दध्योदनः।

3. चतुर्थी तदर्थार्थ-बलि-हित-सुख-रक्षितैः

A चतुर्थ्यन्त word is compounded with another word (प्रकृति) of which the former is its effect (विकृति), and also with अर्थ, बलि, हित, सुख, रक्षित।

यूपाय दारु यूपदारु, कुण्डलहिरण्यम्, द्विजाय इदं पाद्यम् द्विजार्थं पाद्यम्। So also भूतबलि, पुत्रहितम्, पितृसुखम्, गोरक्षितम्।

But रन्धनाय स्थाली, अश्वाय घासः —here no समास for want of प्रकृतिविकृतिभावः ।

4. (*a*) पञ्चमी भयेन

भयेन—with words denoting ' fear '; चौरभयम्, दस्युभीतिः, व्याघ्रभीः

(*b*) अपेता-ऽपोढ-मुक्त-पतित-ऽपत्रस्तैरल्पशः

A few पञ्चम्यन्त words are compounded with अपेत (gone away), अपोढ (removed), मुक्त, पतित, अपत्रस्त (afraid of). सुखापेतः, स्वर्गपतितः । But प्रासादात् पतितः, महाभोजनात् अपत्रस्तः—no samasa.

(*c*) स्तोका-ऽन्तिक-दूरार्थ-कृच्छ्राणि क्तेन ।

[*N. B.*—पञ्चमी स्तोकादिभ्यः—by this rule पञ्चमी of स्तोक etc., does not drop.]

स्तोकान्मुक्तः, दूरादागतः ।

5. (*a*) षष्ठी

A षष्ठ्यन्त, word is compounded with another suitable word.

वृक्षस्य शाखा वृक्षशाखा, सुखभोगः, पयःपानम् ।

Prohibitions of षष्ठी समास

(i) न निर्द्धारणे,

निर्द्धारणे अर्थे या षष्ठी विहिता सा न समस्यते; नृणां श्रेष्ठः ज्ञानी—here नृ-श्रेष्ठ cannot be compounded.

(ii) पूरण-गुण-सुहितार्थ-सद्-अव्यय-तव्य-समानाधिकरणेन ।

A षष्ठ्यन्त word cannot be compounded with ordinals, qualitative words, words denoting 'satisfaction', words formed with सत् (शतृ, शानच्), अव्यय (क्त्वाच्, ल्यप्, तुम्), तव्य, and words standing in apposition to it.

पूरणे—भ्रातॄणां तृतीयः

गुणे—आकाशस्य नीलिमा

(But षष्ठी समास with a गुणवाचक word is not prohibited in all cases, so अर्थगौरवम्, बुद्धिमान्द्यम् etc. are quite correct.)

सुहितार्थे—फलानां सुहितः तृप्तः वा

शतृ—द्विजस्य कुर्वन् कुर्वाणः (शेषे षष्ठी)

अव्यय—ब्राह्मणस्य कृत्वा

तव्य—ब्राह्मणस्य कर्त्तव्यम्

समानाधिकरण—तक्षकस्य सर्पस्य

(iii) क्तेन च पूजायाम्

षष्ठ्यन्त words are not compounded with words formed with क्त (by the rule मतिबुद्धिपूजार्थेभ्यश्च)

राज्ञां मतम्

(iv) कर्मणि च

'उभयप्राप्तौ कर्मणि' इत्यत्र कर्मणि या षष्ठी विहिता सा न समस्यते । आश्चर्यः गवां दोहः अगोपेन ।

(v) तृजकाभ्यां कर्त्तरि

A षष्ठ्यन्त word is not compounded with words formed with तृच् and अक in the कर्तृवाच्य । जगतां स्रष्टा, ओदनस्य पाचकः, प्रजानां पालकः

But याजकादिभिश्च

षष्ठी समास is allowed with याजक etc.; ब्राह्मणानां याजकः ब्राह्मणयाजकः, so देवपूजकः, वेदाध्यापकः, भूभर्त्ता ।

(*b*) एकदेशी समासः

(i) पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ।

A singular एकदेशी (अवयवी, a thing having parts) word unites in षष्ठीतत्पुरुष with पूर्व, अपर, etc.

पूर्वं कायस्य पूर्वकायः ।

But पूर्वः छात्राणाम्—no samasa, because छात्राणाम् is plural.

(ii) सर्व एकदेशः कालेन समस्यते

पूर्वम् अह्नः पूर्वाह्णः, so मध्याह्नः, अपराह्णः, पूर्वरात्रः, अपररात्रः ।

(iii) अर्द्धं नपुंसकम्

A singular एकदेशी is compounded with अर्द्ध in the neuter gender.

अर्द्धं नद्याः अर्द्धनदी ।

Note—अर्द्धम् – half, अर्द्धः—about a half, a part.

ग्रामस्य अर्द्धः ग्रामार्द्धः ।

6. सप्तमी शौण्डैः ।

A सप्तम्यन्त word is compounded with शौण्ड (skilled), धूर्त्त, कितव, प्रवीण, etc.

दाने शौण्डः दानशौण्डः, so ईश्वरे अधीनः ईश्वराधीनः, शास्त्रनिपुणः ।

Other instances—मासदेयम् ऋणम्, तीर्थकाकः (a greedy person.)

B.

कर्मधारय

(Appositional Compound.)

1. तत्पुरुषः समानाधिकरणः कर्मधारयः

कर्मधारय is a variety of तत्पुरुषः । If the members of a तत्पुरुष समास are in apposition with each other, the समास is called कर्मधारय ।

(*a*) विशेषणं विशेष्येण बहुलम्

An adjective is compounded with the noun it qualifies. The word बहुल indicates that such समासs occur *in many ways*, *i. e.*, sometimes समास is compulsory, sometimes it is optional, and sometimes again no

समास is allowed, *e. g.*, (i) कृष्णसर्पः; लोहित-शालिः—here the words are in apposition *i. e.*, they stand as adjectives and substantives, yet the complete word gives a sense different from that conveyed by the words separately Thus कृष्णसर्पः—a cobra, लोहितशालिः—the name of a particular species of grain ; but कृष्णः सर्पः means a black serpent, and लोहितः शालिः means any red grain. So to express the former meanings समास is compulsory, for without समास the meaning intended would not be expressed. These are also known as नित्य समास ।

(ii) प्रियः पुत्रः or प्रियपुत्रः

(iii) रामः जामदग्न्यः, अर्जुनः कार्त्तवीर्यः—here no समास is allowed.

When two adjectives qualify the same object they may form a कर्मधारय समास । नीलश्च कृष्णश्च नीलकृष्णः, so सच्चिदानन्दः ।

(*b*) क्तेन नञ् विशिष्टेनानञ्

A क्त प्रत्ययान्त word preceded by नञ् is compounded with another क्त प्रत्ययान्त word without नञ् । कृतञ्च तत् अकृतञ्च कृताकृतम् (done and not done.)

(*c*) पूर्वोत्तरकालयोः क्तः ।

Two क्त प्रत्ययान्त words are compounded when one refers to anterior time and the other to posterior time.

पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। So शयितोत्थितः, दत्तापहृतम्।

(*d*) वर्णो वर्णेन

नीलश्च लोहितश्च नीललोहितः

(*e*) दिक्संख्ये संज्ञायाम्

To denote a name words expressive of direction and number are compounded with suitable words.

सप्त च ते ऋषयश्च सप्तर्षयः। १.

Strictly speaking these admit of no expansion, for सप्तर्षि does not mean any seven sages, but a particular group.

उपमान समास

2. उपमानानि सामान्यवचनैः

उपमान—The object with which a thing is compared.

उपमेय or उपमित—the thing which is so compared.

चन्द्राननम्—चन्द्र is उपमान,

आनन is उपमेय

सामान्य—the common attribute, on the strength of which the comparison is made.

An उपमान is compounded with the सामान्य; घनः इव श्यामः घनश्यामः, so अर्णवगम्भीरः, अनलोज्ज्वलः ।

उपमित समास

3. उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ।

The उपमित is compounded with उपमानs such as व्याघ्र, पुङ्गव, ऋषभ etc., if the common attribute is not applied.

पुरुषः व्याघ्रः इव पुरुषव्याघ्रः, नरपुङ्गवः ।

But when the सामान्य is actually used, no समास is allowed ; पुरुषः व्याघ्रः इव शूरः ।

रूपक समास is, in, fact, उपमित समास ।

शोकः एव अग्निः शोकाग्निः, पापम् एव पङ्कः पापपङ्कः ।

मध्यपदलोपी कर्मधारय

4. शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम् ।

शाकप्रियः पार्थिवः शाकपार्थिवः (शाकः, an era or power) ; छायाप्रधानः तरुः छायातरुः, देवपूजकः ब्राह्मणः देवब्राह्मणः, घृतमिश्रम् अन्नम् घृतान्नम्; एकाधिका विंशतिः एकविंशतिः ।

मयूरव्यंसकादि समास

5. मयूरव्यंसकादयश्च

मयूरव्यंसक and a few others are irregularly formed ; मयूरः व्यंसकः (धूर्तः) मयूरव्यंसकः, उदक् च अवाक् च उच्चावचम् (high and low), नास्ति कुतः भयं यस्य सः अकुतोभयः, अन्यः राजा राजान्तरम्, चिदेव चिन्मात्रम्, नास्ति किञ्चन यस्य सः अकिञ्चनः

उपपद समास

6. उपपदमतिङ्

An उपपद is compounded with a root other than a तिङन्त; in other words, when ट, ड, खल्, णिन्, विन्, घञ्, क्विप् etc., are affixed to roots preceded by a सुबन्त, the word so formed is called उपपद समास। कुम्भं करोतीति कुम्भकारः (कुम्भ+कृ+अण्), पङ्के जायते इति पङ्कजम् (पङ्क + जन् + ड), स्वर्गं गच्छतीति स्वर्गगामी (स्वर्ग + गम् + णिन्), so, प्रियंवदः, जलचरः, विहङ्गमः, गोत्रभित्

प्रादि गति समास

7. कु—गति—प्रादयः

The particle कु (meaning 'bad'), गति (प्र, परा, etc., when connected with क्रिया are called गति) and प्र, परा etc., are compounded with suitable words.

Of these the words कु and प्र, etc., are compounded with सुबन्त , गति with words other than सुबन्त

कुत्सितः नृपः कुनृपः, कुसृष्टिः

गति समास—प्रणम्य, ऊरीकृत्य शुक्लीकृत्य, पटपटाकृत्य, पुरस्कृत्य, तिरस्कृत्य, सत्कृत्य, अलंकृत्य ।

प्रादि—प्रकृष्टः भावः प्रभावः, सुष्ठु कृतम् सुकृतम्,
सुजनः, सुराजा, सुपन्थाः, अतिराजा, अपशब्दः,
दुर्जनः, विपथम्, अधिपतिः, विपक्षः;
अतिक्रान्ता वेला अतिवेलः;
अक्ष्णा प्रतीतः प्रत्यक्षः;
अध्ययनाय परिग्लानः पर्यध्ययनः
वनात् निर्गतः निर्वनः

नञ् तत्पुरुष

8. नञ् ।

नञ् is compounded with a सुबन्त ।

न लोपो नञः

The न् or नञ् drops in समास ;

न देवः अदेवः, अब्राह्मणः, अप्रियः, अकालः, अधर्मः ।

तस्मान्नुडचि

When न् drops (in Samasa) it is substituted by नुट् (न्) if a vowel follows.

That is, when a consonant follows, नञ् becomes अ, and when a vowel follows नञ् becomes अन् । न ईश्वरः अनीश्वरः, अनादिः, अनन्तः, अनायासः, अनघः ।

द्विगु

9. संख्यापूर्वो द्विगुः ।

A कर्मधारय compound of which the first mem-

ber is a numeral is called द्विगु । द्विगुरेकवचनम्—The word formed by द्विगु समास is singular.

द्विगु समास is used in the following cases :—

(i) संज्ञायाम्—to denote a name—सप्तर्षिः

(ii) तद्धितार्थे—पञ्चभिः गोभिः क्रीतः पञ्चगुः । द्वयोः मात्रोः अपत्यम् द्वैमातुरः ।

(iii) उत्तरपदे—पञ्च हस्ताः प्रमाणमस्य पञ्चहस्त-प्रमाणः (त्रिपदद्विगुः)

(iv) समाहारे—to denote an aggregate—पञ्चानां गवां समाहारः पञ्चगवम् ।

Rules regarding changes and suffixes of compounds, specially of तत्पुरुषः

N. B.—नञ् तत्पुरुष, मध्यपदलोपी, उपमित, उपपद, कर्मधारय, रूपक, मयूरव्यंसकादि, द्विगु, अलुक्, प्रादि, गति, एकदेशी are varieties of तत्पुरुष]

1. तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः (अच्)

In तत्पुरुष compounds अच् is affixed to अङ्गुलि preceded by a numeral or an अव्यय । द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम् (द्विगु), निर्गतमङ्गुलिभ्यः निरङ्गुलम् (प्रादि)

2. अहः-सर्वैकदेश-संख्यात-पुण्याच्च रात्रेः (अच्),

अच् is affixed to रात्रि preceded by अहन्, सर्व, पुण्य and words signifying 'a part' and 'a number'. पूर्वरात्रः, अपररात्रः, (एकदेशी)

अहश्च रात्रिश्च अहोरात्रः (द्वन्द्व), सर्वा रात्रिः सर्वरात्रः, (कर्मधा), द्विरात्रम् (द्विगु), पुण्यरात्रः (कर्मधा) अति क्रान्ता रात्रिम् अतिरात्रः (प्रादि)

(*a*) अह्नोऽह्न एतेभ्यः

अहन् after सर्व etc., turns to अह्न

सर्वाह्णः, पूर्वाह्णः, द्व्यह्नः ।

न संख्यादेः समाहारे

In the sense of an aggregate अहन् after a numeral does not turn to अह्न । द्वयोः अह्नोः समाहारः द्व्यहः, एवं त्र्यहः, दशाहः

उत्तमैकाभ्यां च

Similarly, अहन् after पुण्य and एक also does not turn to अह्न । पुण्याहम्, एकाहः ।

3. राजाहःसखिभ्यष्टच्

राजन्, अहन् and सखि occuring at the end of a समास get टच् (अ);

महाराजः, उत्तमाहः, प्रियसखः

4. पुंवत् कुक्कुट्यादीनामण्डादौ

कुक्कुटी etc., turn to the corresponding masculine forms, if अण्ड, etc., follow ; कुक्कुट्याः अण्डम् कुक्कुटाण्डम्, एवं छागदुग्धम्, मृगक्षीरम्, हंसशावकः ।

5. पुंवत् कर्मधारय-जातीय-देशीयेषु

In कर्मधारय समास and also when जातीय and देशीय follow, a feminine base, which has a corresponding masculine, turns to the

latter. प्रिया दुहिता प्रियदुहिता, सुन्दरी महिला सुन्दरमहिला, प्रथमा कन्या प्रथमकन्या । So पाचक—जातीया पाचकदेशीया (पाचिकायाः ईषद्-ऊना इत्यर्थः)।

6. आन्महतः समानाधिकरणजातीययोः

त् of महत् turns to आ when a noun or the suffix जातीय follows.

महाराजः, महादेवः, महाजातीयः ।

Genders of तत्पुरुष compounds.

1. परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः

The लिङ्ग of द्वन्द्व and तत्पुरुष compounds is the लिङ्ग of the final word.

वृक्षश्च लता च वृक्षलते । इमे कुक्कुटमयूर्यौ, इमौ मयूरीकुक्कुटौ, अर्द्धं पिप्पल्याः अर्द्धपिप्पली, नद्याः कूलम् नदीकूलम् ।

2. रात्राह्नाहाः पुंसि

रात्र, अह्न and अह at the end of a compound are used in the masculine gender. अहोरात्रः, पूर्वरात्रः, पूर्वाह्नः, द्व्यहः पञ्चाहः

संख्यापूर्वं रात्रं क्लीबम् ।

द्विरात्रम्, त्रिरात्रम्, पञ्चरात्रम् ।

3. अपथं नपुंसकम्

अपथ in तत्पुरुष समास is neuter. न पन्थाः अपथम्
In अपथ the समासन्त suffix अ has been affixed to it optionally. So when अ is

not affixed the form is अपन्थाः । *N. B.*— अपथः देशः (बहुव्रीहि)

4. स नपुंसकम्

समाहारद्विगु and समाहारद्वन्द्व are neuter ; पञ्चगवम् , पाणिपादम् ।

(*a*) अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः—त्रिलोकी, सप्तशती ।

(*b*) आबन्तो वा—पञ्चखट्वी, पञ्चखट्वम्

(*c*) अनो नलोपश्च, वा द्विगुः स्त्रियाम्; पञ्चतक्षी, पञ्चतक्षम् ।

(*d*) पात्राद्यन्तस्य न—पञ्चपात्रम्, त्रिभुवनम्, चतुर्युगम् ।

5. (*a*) पुण्यसुदिनाभ्यामह्नः क्लीवतेष्टा—पुण्याहम्, सुदिनाहम् ।

(*b*) पथः संख्याव्ययादेः—त्रयाणां पन्थाः त्रिपथम् । विरूपः पन्थाः विपथम्

6. सभाराजाऽमनुष्यपूर्वा

सभा at the end of तत्पुरुष compounds is used in the neuter gender, if it is preceded by synonyms of राजा (king) or by words other than मनुष्य ।

ईश्वरसभम् , रक्षःसभम्, पिशाचसभम्, स्त्रीसभम्

But राजसभा, चन्द्रगुप्तसभा are quite correct. (पर्यायस्यैवेष्यते) ।

But when सभा means a house it does not become neuter, धर्मसभा = धर्मशाला ।

7. छाया बाहुल्ये

A तत्पुरुष ending in छाया is neuter, when the first word conveys the idea of plurality ; इक्षूणां छाया इक्षुच्छायम् ।

(*a*) विभाषा सेनासुराच्छायाशालानिशानाम् ।
ब्राह्मणसेना ब्राह्मणसेनं वा, गोशालम् गोशाला ।
वृक्षच्छायं वृक्षच्छाया ।

Section 3.

बहुव्रीहि

1. अनेकमन्यपदार्थे

When more than one word ending in प्रथमा combine to mean a thing other than the meaning of the words themselves, the compound is called बहुव्रीहि ।

पीतम् अम्बरं यस्य सः पीताम्बरः—हरिः

The woed पीताम्बर means हरि, and not 'yellow cloth.'

So आरूढः वानरः यं सः आरूढवानरः—वृक्षः
जितम् इन्द्रियं येन सः जितेन्द्रियः—मुनिः
दत्तं धनं यस्मै सः दत्तधनः—विप्रः
च्युतं फलं यस्मात् सः च्युतफलः—वृक्षः
प्रफुल्लं कमलं यस्मिन् तत् प्रफुल्लकमलम्—सरः

Note that in the above expansions different declensions of यत् and तद् have been used according to the meaning. Also note that the बहुव्रीहि compounds are adjectives,

In expanding बहुव्रीहि समास the following method should be adopted :—

पीताम्बराय—पीतम् अम्बरं यस्य तस्मै

पीताम्बरात्—पीतम् अम्बरं यस्य तस्मात्

and so on.

In the above instances the members of the compound all end in प्रथमा, but in some cases some member may end in other विभक्तिs also *e. g.* शूलं पाणौ यस्य स शूलपाणिः शिवः ।

2. तेन सहेति तुल्ययोगे

सह enters into बहुव्रीहि compound with a तृतीयान्त word, when the action performed is the same. पुत्रेण सह सपुत्रः आगतः पिता—अत्र उभयोः आगमनम् तुल्यम् ।

[वोपसर्जनस्य—अप्रधानीभुतस्य सहस्य सादेशः स्यात् वा] सह is optionally substituted by स in बहुव्रीहि,

सहपुत्रः, सपुत्रः । सोदरः, सहोदरः ।

3. तत्र तेनेदमिति सरूपे

If quarrel between two is meant, words similarly declined in तृतीया or सप्तमी are compounded.

The final vowel of the first word is lengthened and the last word gets an इ;
केशेषु केशेषु गृहीत्वा युद्धं केशाकेशि,

So दण्डादण्डि,

But अस्यसि

Rules regarding changes and suffixes of बहुव्रीहि compounds.

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ।

भाषितपुंस्क— a feminine word of which a corresponding masculine form exists.

सूत्रार्थः—तुल्यार्थक-विशेष्य-स्त्रीलिङ्गशब्दे परे सति (अर्थात् बहुव्रीहि समासे, कर्मधारय समासे च) ऊङ्-प्रत्ययान्तभिन्नस्य भाषितपुंस्कस्य स्त्रीलिङ्गविशेषणीभूतपूर्वपदस्य पुंवद्रूपं भवति । पूरणार्थक-प्रत्ययान्तस्त्रीलिङ्गशब्दे, प्रियादिशब्दे च परे तु पूर्वपदस्य पुंवद्रूपं न स्यात् ।

In बहुव्रीहि and कर्मधारय समास, of which the last member is a feminine word (other than a पूरणार्थ word and प्रिया etc.), the first member (if not ending in ऊ) which is an adjective and भाषितपुंस्क turns to its corresponding masculine form (*i. e.* the ई or आ drops).

स्थिरा बुद्धिः यस्य सः स्थिरबुद्धिः, रूपवती भार्या यस्य सः रूपवद्भार्यः ।

But गङ्गा भार्या यस्य सः गङ्गाभार्यः—here गङ्गा is not भाषितपुंस्क;

वामोरूः भार्या यस्य सः वामोरूभार्यः (one having a wife with fine thigh—here the first member ends in ऊ and hence no पुंवद्भाव।

द्वितीया भार्या यस्य सः द्वितीयाभार्यः—here the first word is an ordinal.

सुन्दरी प्रिया यस्य सः सुन्दरीप्रियः—here प्रिया is the last word.

प्रियादि—प्रिया, मनोज्ञा, सुभगा, दुर्भगा, कल्याणी, भक्तिः, स्वसा, कान्ता, समा, चपला, दुहिता, वामा, अबला, तनया and सचिवा।

अप् पूरणीप्रमाण्योः—अप् is affixed to ordinals and प्रमाणी, when they are the last words of a बहुव्रीहि compound.

कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः; स्त्री प्रमाणी यस्य सः स्त्रीप्रमाणः।

(i) न कोपधायाः।

The feminine bases having क as the penultimate letter do not turn to the corresponding masculine forms. रसिका भार्या यस्य सः रसिकाभार्यः।

(ii) संज्ञापूरण्योश्च।

Feminine words denoting 'a name' or an ordinal also, do not turn to the correspondi ing masc. forms.

रोहिणी भार्या यस्य सः रोहिणीभार्यः,
पञ्चमी भार्या यस्य सः पञ्चमीभार्यः

(iii) स्वाङ्गाच्चेतः ।

Feminine words ending in ई and denoting स्वाङ्ग (generally part of the body) also do not turn to the corresponding masc. forms. सुकेशीभार्यः

(iv) जातेश्च ।

ब्राह्मणी भार्या यस्य सः ब्राह्मणीभार्यः

2. बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।

In बहुव्रीहि समास 'सक्थि' and 'अक्षि' get षच् (अ) if they denote limbs.

दीर्घे सक्थिनी (thighs) यस्य सः दीर्घसक्थः । विशाले अक्षिणी यस्याः सा विशालाक्षी

3. द्वित्रिभ्यां ष मूर्ध्नः ।

मूर्द्धन् after द्वि and त्रि gets ष (अ); द्विमूर्द्धः (having two heads), त्रिमूर्द्धः, but पञ्च मूर्द्धानः अस्य इति पञ्चमूर्द्धा

4. अञ् नासिकायाः संज्ञायाम्, नसञ्चास्थूलात् ।

To denote a name नासिका gets अच् (अ) and is replaced by नस्, but not after स्थूल ।

गोरिव नासिका यस्य सः गोनसः ।

But स्थूलनासिकः ।

(i) उपसर्गाच्च

नासिका is replaced by नस् also when प्र etc., precede in बहुव्रीहि

उन्नता नासिका यस्य सः उन्नसः, प्रगता नासिका यस्य सः प्रणसः ।

(ii) वेर्ग्रो वक्तव्यः ख्यश्च । विगता नासिका यस्य सः विग्रः विख्यः ।

5. नित्यमसिच् प्रजामेधयोः

